# केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली
## शास्त्रप्रशिक्षणवर्गः

'नवोन्मेष-नवाचाराः समाश्रितपरम्पराः' इति घोषपोषणतत्परः केन्द्रीयसंस्कृतविश्वविद्यालयः संस्कृतशास्त्राणां सन्धारणे, सम्पोषणे संवर्धने च अस्ति दत्तावधानः। भारतस्य नानादिक्कोणेषु विलसितपरिसरोऽयं विश्वविद्यालयः संस्कृतवटवृक्ष इव शास्त्राणाम् एकनीडमिव राजते। विश्वविद्यालयेनानेन परम्परागतरीत्या अधीयानानां युवपण्डितानां शास्त्रप्रौढिम् आलक्ष्य शास्त्रप्रशिक्षणवर्गः समायोज्यते। तत्र ग्रीष्म-ऋतावस्मिन् मासकालं यावत् अखिलभारतीयस्तरे चितेभ्यः प्रशिक्षणार्थिभ्यः व्याकरणम्, न्यायशास्त्रम् अद्वैतवेदान्तं च इत्येतेषां त्रयाणां शास्त्राणां लब्धप्रतिष्ठविद्वद्भिः ग्रन्थविशेषस्य प्रशिक्षणं प्रदास्यते।

**प्रवेशपरीक्षायां के भागं ग्रहीतुम् अर्हन्ति ?**

शास्त्रि-आचार्य-शिक्षाशास्त्रि-शिक्षाचार्य-विद्यावारिधिस्तरेषु अधीयानाः/प्रवेष्टुकामाः विद्यार्थिनः।

**आयुषः सीमा ?**

01 मई, 2024 इति दिनाङ्के 25 वर्षेभ्यः अधिकम् आयु: न स्यात्।

**कदा कुत्र च ?**

20 मई तः 19 जून, 2024 पर्यन्तं व्याकरणशास्त्रवर्गः विश्वविद्यालयस्य जयपुरपरिसरे (राजस्थानम्), अद्वैतवेदान्तवर्गः श्रृंगगिरिपरिसरे (कर्णाटकम्) न्यायशास्त्रवर्गश्च देवप्रयागपरिसरे (उत्तराखण्डम्) समायोजयिष्यते।

**पञ्जीकरणाय लिंक अथवा क्यू आर कोड**

https://forms.gle/Gkb9XtditFZ6dXu88

**शास्त्रीयग्रन्थविशेषाः के ?**

न्यायशास्त्रे न्यायकुसुमाञ्जलेः प्रथमतः चतुर्थस्तबकपर्यन्तम्

अद्वैतवेदान्ते अद्वैतब्रह्मसिद्धिः

व्याकरणशास्त्रे शब्दरत्नम् अजन्तप्रकरणम्

**प्रशिक्षणार्थिनां चयनप्रक्रिया**

व्याकरणे, न्याये अद्वैतवेदान्ते च आहत्य 90 प्रतिभागिनां (प्रत्येकं शास्त्रे 30) चयनं करिष्यते। प्रविविक्षुविद्यार्थिनः पञ्जीकरणं कृत्वा 28 अप्रेल, 2024 तमे दिनाङ्के प्रातः 11 वादनतः 12 वादनं यावत् समायोजयिष्यमाणे ऑनलाइन परीक्षणे प्रतिभागं करिष्यन्ति। अस्मिन् परीक्षणे शास्त्रसम्बद्धाः 60 वस्तुनिष्ठात्मकप्रश्नाः भविष्यन्ति। ततः वरीयतासूच्यनुसारेण प्रत्येकं शास्त्रे अनन्तिमरूपेण चितानां 60 विद्यार्थिनां साक्षात्कारः 30 अप्रेल तः 01 मई, 2024 पर्यन्तं समायोजयिष्यते। तत्र अन्तिमरूपेण चितानां 30 विद्यार्थिनां सूची 03 मई, 2024 तमे दिनाङ्के विश्वविद्यालयस्य वेबसाइट द्वारा प्रकाशयिष्यते। चयनितविद्यार्थिनः 19 मई, 2024 सायं पर्यन्तं निर्धारितपरिसरं प्राप्स्यन्ति। आरक्षितवर्गाणां विद्यार्थिनां कृते प्रोत्साहनं प्रदास्यते।

**प्रमुखाः विद्वांसः**

प्रो. मणिद्राविडशास्त्री, प्रो. राजारामशुक्लः, प्रो. श्रीपादसुब्रह्मण्यम्, प्रो. सच्चिदानन्दमिश्रः, प्रो. के. ई. देवनाथन्, प्रो. के. विश्वनाथशास्त्री, प्रो. श्रीनिवासः वरखेडी, प्रो. के. ई. मधुसूदनाचार्यः, प्रो. ब्रजभूषणओझाः, प्रो. सी.एस्. एस्. नरसिंहमूर्तिः, प्रो. नवीनहोल्ल, प्रो. गणेश ईश्वरभट्टः, प्रो. रामपूजनपाण्डेयः, प्रो. कृष्णगोपालशास्त्री, प्रो. ललितकुमारत्रिपाठी, प्रो. राजधरमिश्रः, प्रो. भारतभूषणत्रिपाठी, प्रो. विष्णुकान्तपाण्डेयः अन्ये च विशिष्टाः विद्वांसः स्वशास्त्रीयं निर्धारितं ग्रन्थं पाठयिष्यन्ति।

**महत्त्वपूर्णदिनाङ्काः**

| | | |
|---|---|---|
| पञ्जीकरणारम्भदिनाङ्कः (निश्शुल्कम्) | - | 18 अप्रेल तः 27 अप्रेल, 2024 पर्यन्तम् |
| ऑनलाईनपरीक्षादिनाङ्कः | - | 28 अप्रेल, 2024 प्रातः 11 वादनतः 12 वादनपर्यन्तम् |
| वरीयतासूचीप्रकाशनम् | - | 29 अप्रेल, 2024 सायम् 05 वादने |
| अन्तिमचयनाय साक्षात्कारः प्रशिक्षणार्थिनाम् | - | 30 अप्रेल तः 1 मई, 2024 पर्यन्तम् |
| अन्तिमसूचीप्रकाशनम् | - | 03 मई, 2024 पर्यन्तम् |

**विशेषपुरस्काराः प्रमाणपत्त्रं च**

प्रशिक्षणवर्गस्य अन्तिमसप्ताहे अधीतग्रन्थे परीक्षा आयोजयिष्यते। प्राप्ताङ्कानाम् आधारे प्रथमे स्थाने 11000/- द्वितीये स्थाने 7000/- तृतीये स्थाने च 5000/- पुरस्कारराशिः भविष्यति। सर्वेषां कृते प्रतिभागिताप्रमाणपत्रं प्रदास्यते।

**यातायातभोजनावासव्यवस्था**

प्रशिक्षणार्थिनां कृते भोजनावासव्यवस्था परिसरपक्षतः भविष्यति। स्वगृहतः प्रशिक्षणकेन्द्रपरिसरं प्रति यातायातस्य कृते रेल ए.सी. तृतीयश्रेण्याः तथा च स्थानीययात्राव्ययस्य प्रतिपूर्तिः भविष्यति।

**सम्पर्कः -** प्रो. कुलदीपशर्मा (9610422233)

डॉ. गणेश टि. पण्डितः (9449103568)

डॉ. अमृताकौरः (8233464446)

**-प्रो. श्रीनिवासः वरखेडी**

कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली